# শ্রীবালাত্রিপুরসুন্দরীস্তোত্রম্

{॥ শ্রীবালাত্রিপুরসুন্দরীস্তোত্রম্ ॥}

॥ শ্রী বালাত্রিপুরসুন্দর্যৈ নমঃ ॥

॥ পূর্বপীঠিকা ॥

শ্রী ভৈরব উবাচ

অধুনা দেবি ! বালাযাঃ স্তোত্রং বক্ষ্যামি পার্বতি ! ।

পঞ্চমাঙ্গং রহস্যং মে শ্রুত্বা গোপ্যং প্রযত্নতঃ ॥

॥ বিনিযোগ ॥

ওঁ অস্য শ্রীবালাত্রিপুরসুন্দরীস্তোত্রমন্ত্রস্য

শ্রী দক্ষিণামূর্তিঃ ঋষিঃ, পঙ্ক্তিশ্ছন্দঃ,

শ্রীবালাত্রিপুরসুন্দরী দেবতা, ঐং বীজং, সৌঃ শক্তিঃ,

ক্লীং কিলকং, শ্রীবালাপ্রীতযে পাঠে বিনিযোগঃ ।

॥ ঋষ্যাদি ন্যাস ॥

ওঁ শ্রী দক্ষিণামূর্তিঋষযে নমঃ - শিরসি ।

ওঁ শ্রী পঙ্ক্তিশ্ছন্দসে নমঃ - মুখে ।

ওঁ শ্রীবালাত্রিপুরসুন্দরী দেবতাযৈ নমঃ - হৃদি ।

ওঁ ঐং বীজায নমঃ - নাভৌ ।

ওঁ সৌঃ শক্তযে নমঃ - গুহ্যে ।

ওঁ ক্লীং কীলকায নমঃ - পাদযোঃ ।

ওঁ শ্রীবালাপ্রীতযে পাঠে বিনিযোগায নমঃ - সর্বাঙ্গে ।

॥ করন্যাসঃ ॥

ॐ ঐং অঙ্গুষ্ঠাভ্যাং নমঃ।

ॐ ক্লীং তর্জনীভ্যাং নমঃ।

ॐ সৌঃ মধ্যমাভ্যাং নমঃ।

ॐ ঐং অনামিকাভ্যাং নমঃ।

ॐ ক্লীং কনিষ্ঠিকাভ্যাং নমঃ।

ॐ সৌঃ করতলকরপৃষ্ঠাভ্যাং নমঃ।

॥ অঙ্গন্যাস ॥

ॐ ঐং হৃদযায নমঃ।

ॐ ক্লীং শিরসে স্বাহা।

ॐ সৌঃ শিখাযৈ বৌষট্।

ॐ ঐং কবচায হুম্।

ॐ ক্লীং নেত্রত্রযায বৌষতট্।

ॐ সৌঃ অস্ত্রায ফট্।

॥ ধ্যান ॥

অরুণকিরণজালৈ রঞ্জিতাশাবকাশা।

বিধৃতজপবটীকা পুস্তকাভীতিহস্তা।

ইতরকরবরাঢ্যা ফুল্লকহ্লারসংস্থা।

নিবসতু হৃদি বালা নিত্যকল্যাণরূপা ॥

॥ মানস পূজন ॥

ॐ লং পৃথিবীতত্ত্বাত্মকং গন্ধং শ্রীবালাত্রিপুরাপ্রীতযে সমর্পযামি নমঃ।

ওঁ হং আকাশতত্ত্বাত্মকং পুষ্পং শ্রীবালাত্রিপুরাপ্রীতয়ে সমর্পযামি নমঃ ।

ওঁ যং বাযুতত্ত্বাত্মকং ধূপং শ্রীবালাত্রিপুরাপ্রীতয়ে ঘ্রাপযামি নমঃ ।

ওঁ রং অগ্নিতত্ত্বাত্মকং দীপং শ্রীবালাত্রিপুরাপ্রীতয়ে দর্শযামি নমঃ ।

ওঁ বং জলতত্ত্বাত্মকং নৈবেদ্যং শ্রীবালাত্রিপুরাপ্রীতয়ে নিবেদযামি নমঃ ।

ওঁ সং সর্বতত্ত্বাত্মকং তাম্বূলং শ্রীবালাত্রিপুরাপ্রীতয়ে সমর্পযামি নমঃ ।

॥ মূল শ্রীবালাস্তোত্রম্ ॥

বাণীং জপেদ্ যস্ত্রিপুরে ! ভবান্যা বীজং নিশীথে জডভাবলীনঃ ।

ভবেত স গীর্বাণগুরোর্গরীযান্ গিরীশপত্নি প্রভুতাদি তস্য ॥ ১॥ var প্রভযার্দি তস্য

কামেশ্বরি ! ত্র্যক্ষরী কামরাজং জপেদ্ দিনান্তে তব মন্ত্ররাজম্ । var জপেদ্ রতান্তে

রম্ভাঽপি জৃম্ভারিসভাং বিহায ভূমৌ ভজেত্ তং কুলদীক্ষিতং চ ॥ ২॥

তার্তীযকং বীজমিদং জপেদ্ যস্ত্রৈলোক্যমাতস্ত্রিপুরে ! পুরস্তাত্ ।

বিধায লীলাং ভুবনে তথান্তে নিরামযং ব্রহ্মপদং প্রযাতি ॥ ৩॥

ধরাসদ্মত্রিবৃত্তাষ্টপত্রষট্কোণনাগরে ।

বিন্দুপীঠেঽর্চযেদ্ বালাং যোঽসৌ প্রান্তে শিবো ভবেত্ ॥ ৪॥

॥ ফলশ্রুতি ॥

ইতি মন্ত্রমযং স্তবং পঠেদ্ যস্ত্রিপুরাযা নিশি বা নিশাবসানে ।

স ভবেদ্ ভুবি সার্বভৌমমৌলিস্ত্রিদিবে শক্রসমানশৌর্যলক্ষ্মীঃ ॥ ১॥

ইতীদং দেবি ! বালাযা স্তোত্রং মন্ত্রমযং পরম্ ।

অদাতব্যমভক্তেভ্যো গোপনীযং স্বযোনিবত্ ॥ ২॥

॥ শ্রীরুদ্রযামলে তন্ত্রে ভৈরবভৈরবীসংবাদে

শ্রীবালাত্রিপুরসুন্দরীস্তোত্রম্ ॥

Encoded and proofread by Pankaj Dubey dr.pankaj.dubey at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Bala Tripura Sundari Stotram Lyrics in Bengali PDF
% File name : bAlAtripurasundarIstotram.itx
% Category : stotra
% Location : doc_devii
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Pankaj Dubey dr.pankaj.dubey at gmail.com
% Proofread by : Pankaj Dubey dr.pankaj.dubey at gmail.com
% Description-comments : rudrayAmale bhairava-bhairavI saMvAde
% Latest update : April 15, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 12, 2015 ] at Stotram Website